# ॥ યોગતારાવલી ॥

.. yogatArAvalI ..

sanskritdocuments.org

September 11, 2017

# .. yogatArAvalI ..

# ॥ યોગતારાવલી ॥

## Sanskrit Document Information

Text title : yogatArAvalI

File name : yogatArAvalI.itx

Category : stotra, shankarAchArya

Location : doc_z_misc_shankara

Author : Adi shaNkarAchArya

Transliterated by : Arun Shantharam shantharam.arun at gmail.com

Proofread by : Arun Shantharam shantharam.arun at gmail.com

Latest update : April 7, 2009

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

વન્દે ગુરૂણાં ચરણારવિન્દે સન્દર્શિતસ્વાત્મસુખાવબોધે ।
જનસ્ય યે જાઙ્ગલિકાયમાને સંસારહાલાહલમોહશાન્ત્યૈ ॥ ૧॥

સદાશિવોક્તાનિ સપાદલક્ષલયાવધાનાનિ વસન્તિ લોકે ।
નાદાનુસન્ધાનસમાધિમેકં મન્યામહે માન્યતમં લયાનામ્ ॥ ૨॥

સરેચપૂરૈરનિલસ્ય કુમ્ભૈઃ સર્વાસુ નાડીષુ વિશોધિતાસુ ।
અનાહતાખ્યો બહુભિઃ પ્રકારૈરન્તઃ પ્રવર્તેત સદા નિનાદઃ ॥ ૩॥

નાદાનુસન્ધાન નમોઽસ્તુ તુભ્યં ત્વાં સાધનં તત્ત્વપદસ્ય જાને ।
ભવત્પ્રસાદાત્પવનેન સાકં વિલીયતે વિષ્ણુપદે મનો મે ॥ ૪॥

જાલન્ધરોડ્યાણનમૂલબન્ધાઞ્જલ્પન્તિ કણ્ઠોદરપાયુમૂલાન્ ।
બન્ધત્રયેઽસ્મિન્પરિચીયમાને બન્ધઃ કુતો દારુણકાલપાશાત્ ॥ ૫॥

ઓડ્યાણજાલન્ધરમૂલબન્ધૈરુન્નિદ્રિતાયામુરગાઙ્ગનાયામ્ ।
પ્રત્યઙ્મુખત્વાત્પ્રવિશન્સુષુમ્નાં ગમાગમૌ મુઞ્ચતિ ગન્ધવાહઃ ॥ ૬॥

ઉત્થાપિતાધારહુતાશનોલ્કૈરાકુઞ્ચનૈઃ શશ્વદપાનવાયોઃ ।
સન્તાપિતાચ્ચન્દ્રમસઃ પતન્તીં પીયૂષધારાં પિબતીહ ધન્યઃ ॥ ૭॥

બન્ધત્રયાભ્યાસવિપાકજાતાં વિવર્જિતાં રેચકપૂરકાભ્યામ્ ।
વિશોષયન્તીં વિષયપ્રવાહં વિદ્યાં ભજે કેવલકુમ્ભરૂપામ્ ॥ ૮॥

અનાહતે ચેતસિ સાવધાનૈરભ્યાસશૂરૈરનુભૂયમાના ।
સંસ્તમ્ભિતશ્વાસમનઃપ્રચારા સા જૃમ્ભતે કેવલકુમ્ભકશ્રીઃ ॥ ૯॥

સહસ્રશઃ સન્તુ હઠેષુ કુમ્ભાઃ સમ્ભાવ્યતે કેવલકુમ્ભ એવ ।
કુમ્ભોત્તમે યત્ર તુ રેચપૂરૌ પ્રાણસ્ય ન પ્રાકૃતવૈકૃતાખ્યૌ ॥ ૧૦॥

ત્રિકૂટનામ્નિ સ્તિમિતેઽન્તરઙ્ગે ખે સ્તમ્ભિતે કેવલકુમ્ભકેન ।
પ્રાણાનિલો ભાનુશશાઙ્કનાડ્યૌ વિહાય સદ્યો વિલયં પ્રયાતિ ॥ ૧૧॥

પ્રત્યાહૃતઃ કેવલકુમ્ભકેન પ્રબુદ્ધકુણ્ડલ્યુપભુક્તશેષઃ ।
પ્રાણઃ પ્રતીચીનપથેન મન્દં વિલીયતે વિષ્ણુપદાન્તરાલે ॥ ૧૨॥

નિરઙ્કુશાનાં શ્વસનોદ્ગમાનાં નિરોધનૈઃ કેવલકુમ્ભકાખ્યૈઃ ।
ઉદેતિ સર્વેન્દ્રિયવૃત્તિશૂન્યો મરુલ્લયઃ કોઽપિ મહામતીનામ્ ॥ ૧૩॥

ન દૃષ્ટિલક્ષ્યાણિ ન ચિત્તબન્ધો ન દેશકાલૌ ન ચ વાયુરોધઃ ।

ન ધારણાધ્યાનપરિશ્રમો વા સમેધમાને સતિ રાજયોગે ॥ ૧૪॥

અશેષદૃશ્યોજ્ઝિતદૃઙ્મયાનામવસ્થિતાનામિહ રાજયોગે ।
ન જાગરો નાપિ સુષુપ્તિભાવો ન જીવિતં નો મરણં વિચિત્રમ્ ॥ ૧૫॥

અહમ્મમત્વાદ્વ્યપહાય સર્વં શ્રીરાજયોગે સ્થિરમાનસાનામ્ ।
ન દ્રષ્ટૃતા નાસ્તિ ચ દૃશ્યભાવઃ સા જૃમ્ભતે કેવલસંવિદેવ ॥ ૧૬॥

નેત્રે યયોન્મેષનિમેષશૂન્યે વાયુર્યયા વર્જિતરેચપૂરઃ ।
મનશ્ચ સઙ્કલ્પવિકલ્પશૂન્યં મનોન્મની સા મયિ સન્નિધત્તામ્ ॥ ૧૭॥

ચિત્તેન્દ્રિયાણાં ચિરનિગ્રહેણ શ્વાસપ્રચારે શમિતે યમીન્દ્રાઃ ।
નિવાતદીપા ઇવ નિશ્ચલાઙ્ગાઃ મનોન્મનીમગ્નધિયો ભવન્તિ ॥ ૧૮॥

ઉન્મન્યવસ્થાધિગમાય વિદ્વન્ ઉપાયમેકં તવ નિર્દિશામઃ ।
પશ્યન્નુદાસીનતયા પ્રપઞ્ચં સઙ્કલ્પમુન્મૂલય સાવધાનઃ ॥ ૧૯॥

પ્રસહ્ય સઙ્કલ્પપરંપરાણાં સંભેદને સન્તતસાવધાનમ્ ।
આલમ્બનાશાદપચીયમાનં શનૈઃ શનૈઃ શાન્તિમુપૈતિ ચેતઃ ॥ ૨૦॥

નિશ્વાસલોપૈર્નિભૃતૈઃ શરીરૈર્નેત્રામ્બુજૈરર્ધનિમીલિતૈશ્ચ ।
આવિર્ભવન્તીમમનસ્કમુદ્રામાલોકયામો મુનિપુઙ્ગવાનામ્ ॥ ૨૧॥

અમી યમીન્દ્રાઃ સહજામનસ્કા-દહંમમત્વે શિથિલાયમાને ।
મનોતિગં મારુતવૃત્તિશૂન્યં ગચ્છન્તિ ભાવં ગગનાવશેષમ્ ॥ ૨૨॥

નિવર્તયન્તીં નિખિલેન્દ્રિયાણિ પ્રવર્તયન્તીં પરમાત્મયોગમ્ ।
સંવિન્મયીં તાં સહજામનસ્કાં કદા ગમિષ્યામિ ગતાન્યભાવઃ ॥ ૨૩॥

પ્રત્યગ્વિમર્શાતિશયેન પુંસાં પ્રાચીનગન્ધેષુ પલાયિતેષુ ।
પ્રાદુર્ભવેત્કાચિદજાડ્યનિદ્રા પ્રપઞ્ચચિન્તાં પરિવર્જયન્તી ॥ ૨૪॥

વિચ્છિન્નસઙ્કલ્પવિકલ્પમૂલે નિઃશેષનિર્મૂલિતકર્મજાલે ।
નિરન્તરાભ્યાસનિતાન્તભદ્રા સા જૃમ્ભતે યોગિનિ યોગનિદ્રા ॥ ૨૫॥

વિશ્રાન્તિમાસાદ્ય તુરીયતલ્પે વિશ્વાદ્યવસ્થાત્રિતયોપરિસ્થે ।
સંવિન્મયીં કામપિ સર્વકાલં નિદ્રાં સખે નિર્વિશ નિર્વિકલ્પામ્ ॥ ૨૬॥

પ્રકાશમાને પરમાત્મભાનૌ નશ્યત્યવિદ્યાતિમિરે સમસ્તે ।
અહો બુધા નિર્મલદૃષ્ટયોઽપિ કિઞ્ચિન્ન પશ્યન્તિ જગત્સમગ્રમ્ ॥ ૨૭॥

સિદ્ધિં તથાવિધમનોવિલયાં સમાધૌ
    શ્રીશૈલશ્રૃઙ્ગકુહરેષુ કદોપલપ્સ્યે ।
ગાત્રં યદા મમ લતાઃ પરિવેષ્ટયન્તિ
    કર્ણે યદા વિરચયન્તિ ખગાશ્ચ નીડાન્ ॥ ૨૮॥

વિચરતુ મતિરેષા નિર્વિકલ્પે સમાધૌ
    કુચકલશયુગે વા કૃષ્ણસારેક્ષણાનામ્ ।
ચરતુ જડમતે વા સજ્જનાનાં મતે વા
    મતિકૃતગુણદોષા માં વિભું ન સ્પૃશન્તિ ॥ ૨૯॥

॥ ઇતિ શ્રી આદિ શઙ્કરભગવત્પાદ વિરચિતં યોગતારાવલી સમ્પૂર્ણમ્ ॥

Encoded and proofread by Arun Shantharam shantharam.arun at gmail.com

.. yogatArAvalI ..
Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*